स्थलकुमुदः, पुं, (स्थलस्य कुमुदः ।) करवीरः । इति राजनिर्घण्टः ॥

स्थलपद्मं, क्ली, (स्थलस्य पद्मम् ।) स्वनामख्यात-पुष्पविशेषः । ( यथा, भट्टिः । २ । ३ ।

"विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः ।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः ॥")

तत्पर्य्यायः । छत्रपत्रम् २ तमालकम् ३ । इति त्रिकाण्डशेषः ॥ तच्चतुर्व्विधं यथा,—

"चतुर्थी स्थलपद्मानि सेवन्ती गुलदावदी ।
नैपाली च गुलावश्च वकुलश्च कदम्बकः ॥"

इति रावणकृतार्कप्रकाशः ॥

स्थलपद्मः, पुं,(स्थलजातः पद्म इव ।) मानकः । इति रत्नमाला ॥ मानकचु इति भाषा ॥ ( यथा,—

"स्थलपद्ममयं कल्कं पयसा लोड्य पाययेत् ।
शोथामयहरश्चैव सर्व्वाङ्गैकाङ्गशोथजित् ॥"

इति वैद्यकचक्रपाणिसंग्रहे शोथाधिकारे ॥)

स्थलपद्मिनी, स्त्री, ( स्थलस्य पद्मिनी । ) स्थलपद्मम् । वेटतामर इति हिन्दी भाषा । तत्पर्य्यायः । पद्माह्वा २ चारटी ३ पद्मचारिणी ४ सुगन्धमूला ५ अम्बुरुहा ६ लक्ष्मीः ७ श्रेष्ठा ८ सुपुष्करा ९ रम्या १० पद्मावती ११ अतिचरा १२ स्थलरुहा १३ पुष्करिणी १४ पुष्करपर्णिका १५ पुष्करनाड़ी १६ । अस्या गुणाः । गौल्यत्वम् तिक्तत्वम् । शीतलम् । वान्तिरक्तपित्तमेहभूतातीसारनाशित्वञ्च । इति राजनिर्घण्टः ॥

स्थलमञ्जरी,स्त्री,(स्थलस्य मञ्जरी ।)अपामार्गः । इति रत्नमाला ॥

स्थलशृङ्गाटः, पुं, (स्थलजातः शृङ्गाटः ।) गोक्षुरवृक्षः । इति रत्नमाला ॥

स्थलशृङ्गाटकः, पुं, ( स्थलशृङ्गाट एव । स्वार्थे कन् । ) गोक्षुरकः । इति राजनिर्घण्टः ॥

स्थलसीमा,[न्]पुं,(स्थलस्य सीमा ।) स्थण्डिलः । इति भूरिप्रयोगः ॥

स्थला, स्त्री, (स्थल+टाप् ।) जलशून्याकृत्रिमभूमिः । इत्यमरटीकायां भरतः । २ । १ । ५॥ (अस्याः प्रमाणं स्थलशब्दे द्रष्टव्यम् ॥ )

स्थली, स्त्री, (स्थल+ङीष् ।) जलशून्याकृत्रिमा भूमिः । इत्यमरटीकायां भरतः । २ । १ । ५ । (यथा, साहित्यदर्पणे ।

"सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नुपुरमेकमुर्व्व्याम् ।
अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम् ॥")

स्थलीदेवता,स्त्री,(स्थल्या देवता ।) ग्राम्यदेवता । इति केचित् ॥

स्थलेरुहा, स्त्री,(स्थले रोहतीति । रुह+कः ।) गृहकुमारी । दग्धावृक्षः । इति राजनिर्घण्टः॥

स्थलेशयः,पुं,(स्थले शेते इति । इति शी+अच् ।) क्रोडकङ्ककुरङ्गादयः । इति राजनिर्घण्टः ॥ स्थलजाते, त्रि ॥ स्थलशायिनि, त्रि ॥

स्थविः, पुं,(तिष्ठतीति । स्था+"क्षविष्ट्व्वीति ।" उणा० ४ । ५६ । इति क्विन्प्रत्ययेन साधुः ।) तन्तुवायः । स्वर्गः । जङ्गमः । इति संक्षिप्तसारोणादिवृत्तिः ॥

स्थविरं, क्ली,(स्था+"अजिरशिशिरेति ।"उणा० १ । ५४ । किरच्प्रत्ययेन साधुः ।) शैलेयम् । इति राजनिर्घण्टः ॥

स्थविरः, पुं, ( स्था+किरच् । ) ब्रह्मा । इति हेमचन्द्रः ॥

स्थविरः, त्रि, ( तिष्ठतीति । स्था+"अजिरशिशिरेति ।" उणा० १ । ५४ । इति किरच्प्रत्ययेन साधुः । ) वृद्धः । इत्यमरः । २ ।६ । ४२ ॥ ( यथा, मनुः । २ । १२० ।

"ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥"

भिक्षुः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥१।४५॥) अचलः । इत्युणादिकोषः ॥

स्थविरा, स्त्री, (स्था+किरच् । टाप् । ) महाश्रावणी । इति राजनिर्घण्टः ॥ वृद्धा च ॥

स्थविष्ठः, त्रि, (अयमेषामतिशयेन स्थूलः । स्थूल +इष्ठन् । "स्थूलदूरेति ।" ६ । ४ । १५६ । इति साधुः । ) अतिशयस्थूलः । इत्यमरः ।३। २ । १११ ॥ ( यथा, भागवते । २ । १ । २४ ।

"विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ॥"

स्थाणुः,पुं,(तिष्ठतीति । स्था+"स्थोणुः ।"उणा० ३ । ३७ । इति णुः ।) शिवः । इत्यमरः । १ । १ । ३६ ॥ ( यथा, रघुः । ११ । १३ ।

"स्थाणुदग्धवपुषस्तपोवनं
प्राप्य दाशरथिरात्तकार्म्मुकः ।
विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा ॥")

तन्नामकारणं यथा,—

"समुत्तिष्ठन् जलात्तस्मात् प्रजास्ताः सृष्टवानहम् ततोऽहं ताः प्रजा दृष्ट्वा रहिता एव तेजसा ॥ क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम् । उत्क्षिप्तं सरसो मध्ये ऊर्द्धमेव यदा स्थितम् । तदा प्रभृति लोकेषु स्थाणुरित्येव विश्रुतम् ॥"

इति वामने ४६ अध्यायः ॥

( ब्रह्मा । यथा, महाभारते । १ । १ । ३२ ।

"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः । ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥") कीलः । इति मेदिनी ॥ जीवकगन्धद्रव्यम् ।यथा,

"जीवके जीवनो जीवो निधिः स्थाणुः प्रकीर्त्तितः ॥"

इति शब्दचन्द्रिका ॥

स्थाणुः, पुं, क्ली. (स्था+णुः ।) निःशाखवृक्षः । मुड़ा गाछ इति भाषा ॥ ( यथा, देवीभागवते । १ । १७ । ५३ ।

"छायायामातपे चैव समदर्शी महातपाः । ध्यानं कृत्वा तथैकान्ते स्थितः स्थाणुरिवाचलः ॥")

तत्पर्य्यायः । ध्रुवः २ शङ्कुः ३ । इत्यमरः ।२।४।८॥ अशाखवृक्षः ४ । इति जटाधरः ॥ रुद्रभेदः । इति नीलकण्ठः ॥

स्थाणुः,त्रि,(स्था+णुः ।) स्थिरः । इति धरणिः ॥ ( यथा, विष्णुपुराणे । १ । ५ । ५८ ।

"अव्ययश्च व्ययश्चैव यदिदं स्थाणुजङ्गमम् । तत् ससर्ज्ज तदा ब्रह्मा भगवानादिकृत् विभुः॥"

स्थाणुतीर्थं, क्ली,(स्थाणोस्तीर्थम् ।)तीर्थविशेषः । यथा, वामने ४२ अध्याये ।

"स प्रोवाच महादेवो ब्रह्माणं प्रणतस्थितम् । पुण्यप्रदं नृणाञ्चैव तीर्थमाहात्म्यमुत्तमम् ॥ एतत् सन्निहितं प्रोक्तं सरः पुण्यप्रदं महत् । स्थाणुलिङ्गस्य माहात्म्यं ब्रह्मन् मेऽवहितः शृणु॥ अचेतनः सचेता वा अज्ञो वा प्राज्ञ एव वा । लिङ्गस्य दर्शनादेव मुच्यते सर्व्वपातकैः ॥ पुष्कराद्यानि तीर्थानि समुद्रचरणानि च । स्थाणुतीर्थं समेष्यन्ति मध्यं प्राप्ते दिवाकरे ॥ तत्र स्नास्यति यो ब्रह्मन् माञ्च स्तोष्यति भक्तितः । तस्याहं सुलभो नित्यं भविष्यामि न संशयः ॥ इत्येवमुक्त्वा वचनं देवदेवो गतः प्रभुः । देवाश्च ऋषयः सर्व्वे स्वानि स्थानानि भेजिरे ॥ ततः प्रभृति लोकेऽस्मिन् स्थाणुतीर्थं वदन्ति हि ॥"

स्थाण्डिलः, पुं, ( स्थण्डिले शयितुं व्रतमस्य । स्थण्डिल+"स्थण्डिलात् शयितरि व्रते ।" ४ ॥ २ । १५ । इति अण् ।) स्थण्डिलशायी । इत्यमरः ।२।७।४५॥(वाच्यलिङ्गोऽयमिति केचित् ॥)

स्थाण्वीश्वरः, पुं, (स्थाणुरीश्वरश्च ।) शिवलिङ्गविशेषः । यथा,—

"स्थाणुर्नाम्ना हि लोकेषु पूजनीयो दिवौकसाम् स्थाणुरीश्वरः स्थितो यस्मात् स्थाण्वीश्वरस्ततः स्मृतः ॥ ये स्मरन्ति सदा स्थाणुं ते मुक्ताः सर्व्वकिल्बिषैः । भविष्यन्ति शुद्धदेहा दर्शनान्मोक्षगामिनः ॥ इत्येवमुक्त्वा देवेन ऋषयो ब्रह्मणा सह । तस्माद्दारुवणं लिङ्गं नेतुं समुपचक्रमुः ॥"

इति वामने ४२ अध्यायः ॥

स्थातव्यं,त्रि,(स्था+तव्य ।) स्थेयम् । स्थानीयम् । यथा, कालिदासकृतशृङ्गारतिलके ।

"वाणिज्येन गतः स मे गृहपतिर्वार्त्तापि न श्रूयते
प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता ।
बालाहं नवयौवना निशि कथं स्थातव्यमस्मद्गृहे
सायं सम्प्रति वर्त्तते पथिक हे स्थानान्तरे गम्यताम् ॥"

स्थानं,क्ली, (स्था+ल्युट् । ) नीतिवेदिनां त्रिवर्गान्तर्गतवर्गविशेषः । इत्यमरः ।२ । ८ । १९ ॥